# मैत्र-माधुर्यम्

लेखक :

दर्शनशास्त्राध्यापक-श्री-द्विजेन्द्रलाल-शर्म-पुरकास्थ

एम. ए., काव्यतीर्थः

(अवकाशप्राप्त प्राचार्यः राजकीय-महाविद्यालयस्य)

जयपुरम्-फरवरी 1987

प्रकाशक:
**श्री द्विजेन्द्रलाल शर्मा पुरकास्थ**
डी–117, कृष्ण मार्ग, बापूनगर, जयपुर

प्रथमं संस्करणम्
सर्वाधिकार: संरक्षित:

मूल्यम्–**एकादश रुप्यकाणि (Rs. 11/–)**

मुद्रक :
**गर्ग प्रिन्टर्स**
जयपुर–3

# मैत्र-माधुर्यम्

## अथाद्यः सर्गः

कृष्णप्रेममयात्म-प्रत्ययमति बाल्याद् विनीतोऽभयो
धीमान् ब्राह्मण-सूनुरर्क इव वाऽऽत्ताभ्रः सुदामा व्रजे ।
पत्नीं चानुरतां सतीमनुदधत् पद्मां यथा माधवो
दोर्धं दैन्यप्रमर्दितो दमधनोऽदामाऽद्रुतोऽविद्यत ।। 1 ।।

कायक्लेश-शतैरकर्कश-कृति भिक्षान्न-कुक्षिभरि-
र्जीर्णेऽपूर्णकृते विवर्ण-भवने वर्षातपे विघ्निते ।
कृच्छ्रं जीवन-यापनं प्रतिदिनं निन्दन् स्वदैन्यार्दनं
प्रायः प्रेमपयोनिधिं प्रियसखं विप्रोऽस्मरत् प्रीतिदम् ।। 2 ।।

ग्रामान्तेऽप्यघनागमाग्र-सुभगैः पत्रार्घ्य-रागग्रहै-
र्व्रणांशो दिवेसेऽपि बाधितदिव श्छायान्ध्यदे दुःस्थले ।
रात्रौ तामस-शैत्य-जन्तुभिरतो व्युत् पीडिते वै स्वत
आवासोऽस्य समोऽभवद् गततृषां श्रीश्रान्ति-मिश्राश्रमैः ।। 3 ।।

कान्तारान्तगते नितान्तनिभृते कान्तिच्युतेऽन्तर्गृहे
पत्न्या रत्न-भया प्रयत्नपरया प्रत्नानुशंस-क्रिया ।
एकस्मिन् दिवसेऽवसादगमितो दारिद्र्य-दीर्ण-त्रपो-
वारं वारमनन्तपारमवशोऽभावाब्धिमब्रूत सः ।। 4 ।।

"विद्यामुद्धृतिदायिनीं विदधतोऽप्युत्कृष्ट-सत्वान्वितां
निर्वित्ता अवहेलितात्मकृतयः सद्वृत्तिमन्तोऽपि वा ।
कालेऽलालित-पल्लवालितरुवल्लावण्य-रिक्ता नरा
लुप्ताभा अवरा भवेयु रवनौ संभाविता वै कुतः ।। 5 ।।

प्रायः प्राशन-शून्य-शुष्कवदनैः संक्षीण-देहै र्नतै-
र्भक्ष्याभक्ष्य-विवेचना-विरहितै र्हीनात्मधी-व्याधितैः ।
तै-श्चांचल्यत आर्तिसंहति-सहै र्मार्गस्थ-धूल्योद्धृति-
र्भिक्षान्नं यदि वाप्यतेऽपि किमित स्तत् क्षुच्छमेऽस्त्यक्षमम् । 6 ।

केशा कंटकि-कुन्तला सचिकिला स्तैलं बिनाऽचिक्कणा
देहो दंड इवाऽविमंडकठिनः शुण्डाकृति र्विक्षतः ।
प्लुष्टः कर्पट एवपाटितपटो गात्र-त्रपा-त्रासनो
वित्ताऽभाव-प्रभाव-बाधित-गते र्नु र्भाग्यमेवंविधम् ॥ 7 ॥

कंठेऽकुंठित-कूट-कुंभवहनो ना किं तरेदम्बुधिं
पक्षी पक्षमृतेऽन्तरिक्षगमने स्यादत्र किं सक्षमः ।
ऊर्द्ध्वं स्थातुमनात्त-साधनधनोऽप्यद्रिः कुतोऽर्हेद्वत
दैन्यार्ता भुवि वंचित-व्यवसिता व्यर्था भवेयुर्नराः ॥ 8 ॥

दारिद्र्यं धिगितोऽधिकं च धरणौ धिग् दैन्यदग्धान् नरान्
भोज्यांऽगावृति-साधनार्जनकृतौ सम्मार्जनीजर्जरान् ।
सर्वानेव य आत्मप्रत्यहृता श्चान्याश्रिता लांछिताः
स्वल्पैः सज्जन-साधुभि र्भुवि विना कस्तान् पुनः पृच्छति ॥ 9 ॥

मित्रै श्चाप्यवधीरितोऽमितमितोऽकस्माद् यदि क्वेक्षितो
ज्ञात स्तै र्न तदाप्यनागतइवाऽवज्ञात आस्थाच्युतः ।
पश्यन्नुत्सुक एव तान् पथिचितान् दैन्यच्छदाक्षोऽप्यहं
किन्वाप्नोमि परां तथाऽर्थरहितो ब्रह्मात्मतुल्यां गतिम् ॥10॥

दुर्व्याधिक्षयिनेऽथवा ऽन्त्यजनये व्यर्थार्थि-निक्षेपवत्-
मत्तुल्याय जनाय तुच्छचितयेऽप्यस्तुत्य-सत्तावते ।
केचिद् भैक्ष्यतनून् अभक्ष्यतुलितान् वोपेक्षितान् तंडुलान्
यच्छन्त्यत्र धनाऽस्मिताऽऽतपतता वाऽवांछितान् हेलया ।। 11 ।।

स्वस्थाने धृतवास-सौख्य-चरिताः स्वल्पश्रमेऽवस्थिता
गायन्तः क्वच नर्तनात्तचरणा आनन्द-धन्याः स्वयम् ।
आरण्या पशवो विहंगमगणाः स्वच्छन्द-चाराजितं
खादन्ति स्वक-खाद्यमाधि-रहिता श्चादैन्य-पण्यं सदा ।।12।।

मत्तुल्या मनुजा महाश्रम-दमा मन्दाश्च निन्द्यस्मिता
दौर्भाग्याद् गत-भाति-बोध-विभवा भव्योपभोगच्युताः ।
सर्वापत्ति-प्रदां च दुर्दमविधिं धृत्वोदितां दीनतां
लोकेऽधः-पतिता स्तु तामस-वृतास्तिष्ठन्तु पृथ्व्यां कथम् ।। 13 ।।

शीत-ग्रीष्म-प्रभाव-बाधित-वपु र्वर्षाम्बु-सिक्तो भृशम्
एतेषां शम-साधनै र्विरहितो भूयोऽवसादावृतः ।
नित्यं व्यर्थमति स्तथाप्यनियतै र्यत्नैः शतै रक्लमो
ग्राह-ग्रासित-विग्रहस्य नुरिव प्राप्नोम्यहं दुर्गतिम् ।। 14 ।।

त्वां पत्नीमतुलां गुणाकृतिधृतां प्रीत्यर्थ-दीप्तां स्वतः
प्राणेभ्योऽपि प्रियामतुल्य-प्रतिभामापन्न-पुण्यां रताम् ।
वस्त्रान्नैरपि तोषणाक्षम इतो कक्षे विभंगक्षते
नित्यं कुत्सित-कृत्य-तापतुदितः संतापयाम्यार्तिभिः ।। 15 ।।

आकांक्षा स्त्वदकांक्षिता अपि धृताः सुप्ताः किलाऽपेक्षिता
जानन्नक्षम एव पूतिकरणे तासामहं क्षेमदे ।
भव्यास्वादबुधा हृदि स्वयमपि श्रेष्ठ-स्वभावा स्त्वपि
पत्युः प्रेमवसुश्रिता बहु-सुख-स्वप्न-श्रियः स्युः स्त्रियः ॥16॥

एकं वै सुहृदं प्रियात् प्रियतरं बाल्याच्चिरं वत्सलं
मैत्राभ्यर्थित एव गोपवसतौ क्रीडासु पाठेष्वपि ।
कृष्णं दुःखनिवारणक्षममहं सांस्मर्य ईड्यं परं
प्रीति-प्लावितमद्भुतात्मचरितं दैन्यान्तकं सार्थकम् ॥ 17 ॥

आर्तान् यः सततं तु तारयति तान् भ्रान्तान् भ्रमान्मोचयन्
अज्ञानानपि हीनवृत्ति-पतितां श्चोद् धारयत्यन्त्यजान् ।
नीचैःस्थान् प्रति मित्रताऽऽदर-धरः सद्-भाव-प्रेमाम्बुधिः
कृष्णोऽस्त्येक इहाऽमरैरपि सदा संवन्द्यमानः स्वयम् ॥18॥

पूतात्मा प्रणयार्णव स्त्वरिरिपुः कंसादि-दुर्वृत्तभित्
कृष्णः स्नेहनिधिः सुधोत्तमवदै र्वक्त्रेन्दु-विस्यन्दितैः ।
गोपालान् किल कृष्ण-लिप्सु-सकलान् सर्वानशक्तान् सखीन्
साधून् सच्चरितांश्च दुःख-विदरान् नॄन् सादरं नन्दयेत् ॥ 19 ॥

कारुण्याऽम्बुधिरेव विग्रह-धरो यस्मिन्ननन्तोऽतटो
वैचित्र्यात् खलु लीलयाऽल्पप्रणयं लब्ध्वापि लालित्यवान् ।
कृष्णोऽसौ पुरुषर्षभो हि विषमेऽर्थाऽभावशीर्षे भवे
सर्वान् प्लावयति प्रभूतप्रणयैः प्रेमाथिनोऽमामृतैः ॥ 20 ॥

क्लेशार्तानिह दैन्य-पीडित-मतीनस्वस्थतात्तव्यथान्
मर्मज्ञः सुमनाः प्रवीण-प्रतिभस्तान्-प्रीणयन् सर्वथा ।
सम्यक् सान्त्वयति व्रतीव सततं नथ्यं करोत्युत्थितं
कृष्णप्रेममयो विमोहक-मुखः संमर्दयन् दर्पितान् ॥ 21 ॥

सत्प्रेमांजन आर्जवार्जितजयो जीवस्य वज्रोरसोऽ-
सौ नीलोत्पल-कोमलोऽल्पकलुषं लोकेऽवलीलाच्छलैः ।
अम्भोजालि-सुदुर्लभादपि मुहु र्नम्रत्ववत्वाच्च तच्-
चित्तं प्रीति-सितं तथाऽप्यतितृषं संप्रापयत्यद्भुतम् ॥22॥

भूयो भूय इतो विवक्र-विचरे व्यक्तार्तिवृत्ते भवे
आश्वस्तान् धृत-प्रत्ययान् तु नितरामस्मान् सदाऽप्रीणयत् ।
कृष्णो बाल्यसखोऽप्यसंख्यविपदो निःशंकं कृन्नश्च तं
संस्मर्येऽहमिहायुतायुधधरादिन्द्रादपीष्टप्रदम् ॥ 23 ॥

कृष्ण-स्नेह-सुशोभमाद्यदिवसं सौख्यास्पदं सुस्मितं
क्रीड़ा-पाठ-कृतैष्वनल्पमधुरं चापूर्वमात्तादरम् ।
जीवाजीवभजं च साम्य-सुषमं सौभाग्य-भोगाभयं
बाल्यं जीवनमद्भुतप्रभमहो भूयः स्मराम्यव्रणम् ॥ 24 ॥

वंशीवादन-पाटवादभिनवं वेदाऽधरं सुस्वरं
सर्वैरेव वरेण्यमभ्रमबुधैः सम्मोहनं पावनम् ।
शृण्वद्भिर्भुवि विस्मयावधिदरं संस्मार्यमासीदितो
नित्यं तद् व्रजवासिभिर्विदधतो मुग्धैर्धृतं तस्य वै ॥ 25 ॥

नारी गोपवधूरबोधहृदया बाधाभिभूत्यापदो
मुक्ताः स व्यदधात् सदादरधरा धन्याश्च नन्दास्पदम् ।
वृक्षान् पुष्प-सुशोभितांश्च विहगान् भृंगान् पतंगान् मृगान्
कृष्णः सोऽकृरुतानिशं च विलसन् स्नेहाभिषेकाप्लुतान् ॥26॥

कृष्णो नीलमणि स्त्वनन्त-सुषमो वाक्यामृतैः प्रेमभि-
र्वंशीवादन-पाटवै रविरतं सर्वान् समाकर्षयन् ।
श्यामोऽप्येवमशेष-भेदरहित श्चांगीकरोत्यादृतान्
स्वात्मन्यात्तमैत्रप्रीति-ममतान् नामार्थमाप्नोत्यतः ॥ 27 ॥

कृष्णो जीवकुलं कलंक-दलनोऽप्यम्लान-लालित्यवान्
सर्वं तद्गतमेव वैक्लवधृतं संकल्पयन्नक्लमम् ।
उत्पातोत्प्लव-घात-बिघ्नविहतान् सद्भाव-वाहान्नरान्
कुर्वाणो भव-वार-बाध-रहितान् नित्यं च सोऽनन्दयत् ॥28॥

रासे नृत्य इतः स गोपवनिता-संवेष्टितोऽतन्द्रित—
स्ताभिस्त्यक्त-प्रतीतिभिः पतिसुतास्मित्वोज्झिताभिः स्वतः ।
प्रेमानन्त-रतिर्निकुंजविपिने किं वा मधूद्यानके
सर्वा स्ता अभिनन्दिता स्त्वनुगता अप्रीणयत् सर्वथा ॥ 29 ॥

कृष्णः सोऽप्यधुना सुदूर-सदने द्वारावती-धामनि
सौन्दर्योद्भुत-दीप्ति-दर्पित इतो देवेन्द्र-पुर्योत्तमै ।
वन्द्यो यादववृन्द-बांधव-धरः सद्मोत्सदोऽरिन्दम—
स्तिष्ठत्यस्मदनल्पवैभव-पणः क्लेशार्ह-मार्गात्यये ॥ 30 ॥

एकोऽहं भुवि वंचितो व्यवहितः सौहार्द्यवद्-बन्धुना
कृष्णेणेह सुदैन्य-नम्रनयनोऽनन्याश्रयोऽनन्दितः ।
क्षीणे कक्षतले च लक्ष्यरहितः प्रेक्षेऽहमुत् क्षुब्धधी-
र्विश्वं चाप्युपपद्यवित्तमनिशं स्वत्वच्युतं वाऽप्यसत् ।: 31 ।।

कृष्णेऽस्मिन् मथुरापुरे निवसति स्वस्थेऽन्तिके तद्गतैः
प्रेमाधारित-चित्त-वृत्ति-कृतिभि र्जात्वन्त्यजातैरपि ।
अस्माभिश्च नरैः परातितुदितैः संगम्य आसीद् द्रुतं
क्वाऽद्यासावति-दूर-प्रस्थिति-परः प्रत्याप्यतां मे पुनः ।।32।

तस्यां दूरगतौ प्रभूत-विभवोऽप्यव्याहत-व्याहृतो
रम्यामामितद्युतावधिकृतेः स द्वारकायां स्थितः ।
नो जानाम्यधुनापि मां व्यवहितं दैन्यार्तमात्मार्पितं
तत्प्रेयांसमसंशयं सखिवरं किंवा स्मरेद् वाऽस्मरेत् ।। 33 ।।

दुःस्थस्याद्य भयव्यथावृतमते र्व्यर्थस्य मे प्रेयसि
त्वं शान्ते स्वपतेः स्वतः समुचितं ब्रूयाश्च मन्निर्भरे ।
कर्तव्यं खलु कर्कशं श्रमकरं वा दुष्करं चिन्तये–
र्दैन्याब्धौ पतितस्य भीत-प्रकृते र्मेऽतोऽन्ततः किंचन ।। 34 ।

सुदाम-वक्त्रेन्दु-विनिः सृतं तथा
सती सुधारधारमिवार्द्र-जल्पितम् ।
निशम्य दुःखाकुलिताऽनुकम्पया
समानुभूत्याऽभवदश्रुलोचना ।। 35 ।।

अनिन्द्य-धैर्या दयितार्थमुत्सुका
क्षणं मृगाक्षी क्षणभेव भामिनी ।
सतीह तूष्णीमभवत् सवेदना
ततोऽद्रुतं वक्तुमियं समुद्यता ॥ 36 ॥

---

इति दर्शन-शास्त्राध्यापक-श्रीमद्-द्विजेन्द्रलाल-शर्म-पुरकायस्थ-विरचिते मैत्र-माधुर्ये लघुकाव्ये मित्रानुस्मरणं नाम प्रथमः सर्गः ॥

# मैत्र-माधुर्यम्

## अथ: द्वितीय: सर्ग:

संबोधिता प्रियतमेत्थमनल्पजल्पै:
प्रीताऽथ तत्परतयाऽवददिन्दु-वक्त्रा ।
आश्लेषितं पतिमित: परितापवन्तं
सोद्बुद्धधी:सहृदया मधुवादमाद्यम् ।। 1

क्षीराब्धिजाऽक्षयमति: कमला मृगाक्षी
विष्णुं यथा निगदति प्रतिभा-ततश्री:।
पत्नी तथैव विनताऽवददुद्धृताश्रु-
स्तं सान्त्वयन्त्यप्रतिमा प्रतिपत्ति-दीप्ता ।। 2 ।।

"ब्रूहि त्वमेव यदि तद्व्यवधान-दु:स्थं
तद्दर्शनार्थमधनं समुपस्थितं त्वाम् ।
द्वारावतीश-वसतौ पथि-कृच्छ्रतार्तं
संभावयेत् स गमने तत उद्यत: स्या: ।। 3 ।।

भूयो विचार-विवृतिं बहुधा धरन्ती
त्वां स्वामिनं श्रमशत-व्यथिताऽग्रयाने ।
प्रोत्साहितं कथमहं करवाणि सद्य-
स्त्वां ते सखाऽस्मृतिवशाद् यदि नाऽऽद्रियेत ।। 4 ।।

मार्ग:सुदीर्घ-पदनोऽदम-विघ्नवर्गै-
र्दु:खात्यय स्तव कथं त्वतिवाह्यतां वा ।
इत्यन्तरे पुनरहं परिचिन्तयन्ती
संवेग-वेदन-दराऽस्म्यमिताऽनुतप्ता ।। 5 ।।

क्लेशैरशेष-निशितैः कृश-सत्व-शक्ते-
र्वित्तच्युतस्य नितरां क्षुधितोदरस्य ।
का ते गतिः पथि तथापतितार्तिवृत्तौ
गन्तुर्भ-वेदिति परं परिशोचनीयम् ॥ 6 ॥

काले सुदीर्घविततौ त्विह रिक्त-सत्ता
क्लिष्टं पथिश्रितगतिं चिरमर्चयन्ती ।
त्वामेव प्राणप्रतिमं तनु-मात्रमूर्ति-
रेकाकिनी, कथमपि प्रतिसंधिमीहे ॥ 7 ॥

त्वं वै सहाय-रहितोऽपि सखिच्युतः सन्
वित्तादृते गतिपथेऽमितविघ्न एकः ।
सर्पन्नशान्तमनसाऽनिशमात्त-सादः
क्लेश-श्रमार्त्युपशमं कथमादधीथाः ॥ 8 ॥

कं संशयं च विषमं यदि शंसिते तद्-
द्वारावती-गतिपथे त्वमनात्त-सात्वत् ।
प्राप्नोषि तर्हि स कथं तव वार्यतां वा-
अत्तीति मां घुण इत स्तु यथाऽऽर्त-काष्ठम् ॥ 9 ॥

दुर्लंघ्य-लंघनमपि प्रसरं विलंघ्य
द्वारावतीपुरगतो यदि बाधितो वा ।
त्वत्स्वागतं सखिचरै रकृतं प्रतीत्य
किंवा करिष्यसि तदा विषमस्थिति-स्थः" ॥ 10 ॥

उक्त स्तथा दयितया स्थिरधीः सुदामा
विश्वासमात्ममनसोऽशममुद्धरन् वै ।
आश्लेषितामकुरुताऽप्रतिमां स्वपत्नीं
प्रोत्साह-भास-विशदै र्वचनै स्तपास्याम् ॥ 11 ॥

पत्नी-समक्षमचिराद् विधृतात्म-सत्व-
उद्बुद्ध-प्रत्ययतया व्यथितोऽप्यशंसत् ।
साश्वासनं भृशमितः स्वक-निश्चयं स
निःशंक एव सुमति र्धृत-धैर्य-धामा ॥ 12 ॥

"कृष्णे ममाऽमितमतावनुरक्तबुद्धे-
र्निःसंशयं श्रमवत स्ततप्राप्त ईड्ये ।
मत्स्वागतं समुचितं तदुपस्थितस्याऽ-
वश्यं भवेदकृपणं त्विति निश्चितं मे ॥ 13 ॥

प्रेमार्णवे हितकृति प्रतिपन्नवित्तौ
सख्यौ स्वतो यदुपतावपि मेऽमितार्थे ।
विश्वासमाद्यमनिशं त्वशमं विधृत्य
गच्छेयमद्य सपदि त्वरयादिशे र्माम् ॥ 14 ॥

श्रुत्वा प्रिया प्रियवचःप्रतिपादितार्थं
सा निश्चयं सखिगृहोपगमोत्सुकस्य ।
पत्युः सृताश्रु–तरलापि तथोद्गताशा
तूष्णीं स्थिता कथमपि क्षणमेकमासीत् ॥ 15 ॥

इत्थंगतां द्रुतमतिः परिवीक्ष्य तां स
नानाविधं बुधि विधु-द्रव-वाक्यमार्द्रः ।
भूयोऽवदद् भ्रम–भयं दधतीं कथंचिद्–
आश्वस्ततामप्रमितामभिसिच्य तस्याम् ॥ 16 ॥

कालं विलम्बितमपि प्रमितं तु कंचिन्-
नेष्याम्यहं पथि यथात्त-प्रवास-खेदः ।
त्वं चापि दुःसहमिहाऽऽधृतधैर्य-बोधा
बिच्छेद-दुःखमदमं दयिते सहस्व ॥ 17 ॥

नित्यं गृहेऽपि निवसन् बहुदुःख-भारं
निकृष्टजीवनमिहाऽशममावहामि ।
नूनं वरं सकृदतोऽधिक-खेद-वृन्दं
क्लेशापनोदन–कृतावचिरात् स्वजेऽहम् ॥ 18 ॥

त्वामत्र पीडितमतिं दयिते गृहस्थां
संस्मृत्य कान्त-रहितामधिकार्ति-तप्ताम् ।
क्लिश्यन् यथाहमधुना गतवान् प्रवासं
त्वं वै तथा कथमपि प्रसहस्व दुःखम् ॥ 19 ॥

नान्या गतिः प्रियतमे विरतेः परार्तेः
कापि क्वचाऽस्त्यत इहाभिमतं ममेति ।
त्वं चापि सन्मतिचरे सुविचार–चारो
संचिन्त्य चन्द्रवदने चर वोचितं तत् ॥ 20 ॥

धैर्याधृतौ हि निहिता सुदिनागमाशा
तत्रैव दैन्यशमनं क्व च संभवेद् वा ।
यत्ने कृतेऽपि यदि वाऽस्ति न कार्य-सिद्धि-
र्दोषोऽत्र कश्च भवतीति प्रवाद-वाक्यम् ॥ 21

उत्कुष्ट-कष्ट-सहनं कमपीष्ट-निष्ठो
यत्नं ततोऽहमितं श्रम-कृत्स्न-रत्नैः ।
कर्तुं प्रियेऽस्मि सुचिति स्वधनो धनार्थी
त्वं चादिशेः सखिगृहे गमनाय मोत्कम् ॥ 22 ॥

संत्रासिताऽऽशु-निशितैर विरहैः सती सा
पुष्पावलिं सुललिताब्जदलैं विरच्य ।
भक्तं तु तंडुलमपि प्रविधाय तूर्णं
पत्यै स्वतोऽर्पितवती प्रमितं तदन्नम् ॥ 23 ॥

वस्त्रांचलेऽस्य पिहितं दयिता समाल्यं
प्रीत्युपहारमिव तत् प्रमितान्नमर्घ्यम् ।
कृष्णार्थमर्पितवती प्रणयेण पत्यै
संवेग–वेग-विनताऽवददावृताक्षी ॥ 24 ॥

"प्रेम्णाऽमितार्ति-प्रणताऽपि सखिप्रिया ते
स्नेहार्द्र–सत्व-सुसितं धृतदैन्य-भारा ।
क्षुद्रं कदन्नमपि तेऽर्पयति प्रपन्ना
गृह्णीष्व मित्र कृपया सुकृते' वदेस्तम् ॥ 25 ॥

क्लिष्टाऽविभा विरहतो विवशा विविक्ता
कालं त्वकालमिव वै मलिनं प्रलम्बम् ।
नेष्याम्यनन्यशरणाऽप्यनुचिन्तयन्ती
त्वामेव प्रेममधुरं मम प्राण-कान्त ॥ 26 ॥

प्रत्यागतिं पुनरितोऽप्यति-तांत-तीर्थां
पूर्णाश-भास-विशदां शुभदामविघ्नाम् ।
सर्वेक्षणं स्वनयनं ननु नान्यलक्ष्यं
साकांक्षमस्तु मम ते तु प्रतीक्षमाणम् ॥ 27 ॥

स्वास्थ्यं सुलक्षणमिदं तव रक्ष नित्यं
कामं च मार्गगमने स्वयमेकक स्त्वम् ।
विष्णुं स्मरन् सर सुखं स्वमितः प्रवासं
गत्वा च सत्वरमिह प्रतिवर्तितः स्याः" ॥ 28 ॥


कान्तं तथाग्र-गमनोद्यतमेव सद्य-
आश्वासिताऽपि तुदितात्त-वियोग-भारा ।
विघ्नघ्न-विष्णु-शरणं बहुशः श्रयन्ती
संश्लेष-चुम्बन-भृतिः पतिमत्यजत् सा ॥ 29 ॥

विष्णु-र्गणेश इति नुः शिव-शंसति श्च
सन्नाम-संस्मृतिरपि शुभ-साधिकाऽस्तु ।
पन्थाः स्वतोऽस्तु सुखितो हृतविघ्न आशु
तेषामनिष्टशमनैः स्मरणैः शिवश्च ॥ 30 ॥

उत्साह-सद्म-सरसं स्मरणं पुराणां
सर्वेषु सत्सु विसनन् स्वत इष्टकृत् सत् ।
विश्वासकर्मसु सुहृन्नर एत्यनार्तिम्
इत्याद्यप्रत्ययप्रभोऽप्यदधात् सुदामा ॥ 31 ॥

अलमललितलीला स्वान्तरेऽशान्त-चिन्ता
श्लथमतिरतिगत्यै विप्रलम्भस्य पत्याः ।
शम-सुख-रस-सत्तां साऽपि तत् सत्यसन्धाम्
असनदगद-गंगां मंगलांगानुषंगाम् ॥ 32 ॥

घृतमतिकृतिप्रीतिः संश्रितास्थः स्वमित्रे
हृतरति-दयितां तच् चत्वरान्ते त्यजन् सः ।
स्मृतगणपतिरार्तोऽप्याप्तशक्तिस्त्वशान्तोऽ-
व्रजदनियत-तृष्ण स्तांन्त-तीर्थात्म-यात्राम् ॥ 33 ॥




---

इति दर्शन-शास्त्राध्यापक-श्रीमद्-द्विजेन्द्रलाल-शर्म-पुरकायस्थ-विरचिते मैत्र-माधुर्ये लघुकाव्ये पति-पत्नी-संवादो नाम द्वितीयः सर्गः ॥

# मैत्र-माधुर्यम्

## अथ तृतीयः सर्गः

आशादीपं हृदि सदुदयं धारयन् मन्द-दावं
सन्तापार्तो दयितरहितः कृष्ण-मैत्रोद्धृतात्मा ।
सन्देहान्दू-दल-धृतिरतो दीर्घ-पद्ये दुरन्ते
मंदं मंदं पथि दृढपदोऽपद्यताग्रे सुदामा ॥ 1 ॥

पत्नीमेकाममितमनुमां छेद-दग्धां तदास्थां
क्षुद्रे कक्षे क्षयततिदरे निक्षिपन् भक्ष्यहीनाम् ।
दीने देहे श्रम-धृति-वृते बद्ध-विश्वास-वृत्ते
नित्यं चित्तेऽपि भयचकिते सत्यगच्छत् स आर्तः ॥ 2 ॥

मार्गं वक्रं ह्यसममसुखं बन्धुराद्रिच्छदान्धं
कुत्राप्यार्द्रं क्व धृतरजसं चोष्ण-धूलि-प्रलेपम् ।
क्लेश-क्लान्तिप्रदलदमितं रौद्र-दाहाद-देहं
वर्षा-क्लिन्नं शिशिर-निशितं सोऽतरन् मैत्र-मग्नः ॥ 3 ॥

संकल्पाढ्यः श्रम-धृति-घन श्चाधनोऽप्याद्य-बोधो
विश्वासाशा-सुलव-विभवो बिभ्रदव्यर्थ-वृत्तिम् ।
भूयः पृच्छन्नविरतगतिः पश्चिमायां दिशीतो
मन्दं सोऽद्याऽद्रवदथ तथा भूतनाथो यथाद्रौ ॥ 4 ॥

काले क्राम्यन् क्लमकर-चरः कृत्य-कार्श्यंककायो
वन्धु-प्रेम्णाऽप्यदमितधिया मन्दधामा सुदामा ।
मन्दं मन्दं पुनरविरतं पद्यमानोऽध्वनीनः
सद्योऽगच्छत् क्षणविरतये पुष्करं स्नानपुण्यम् ॥ 5 ॥

दत्तात्रेयाश्रम उपगतः सोऽर्वुदाद्रौ सुतुंगे
साकांक्षाणां प्रथम-शरणं शीतलेऽनन्त-शान्तौ ।
तिष्ठन् तत्र क्षण-कतिपयं प्रार्थितात्म-प्रतोषेऽ-
प्यग्रेऽगच्छद् गुरुगति-गुणो दक्षिणस्यां दिशीतः ॥6॥

कामं कृष्णो मनसि च मुखे संधृतो मित्रमीप्सो-
मार्गे गन्तोरमलिनमते श्चामृतं क्रान्त-मूल्यम् ।
धावन्नद्याः सजवमुदकं पद्मवृन्दं यथेह
बन्धु-प्रेमाऽमितबलधरं तं तथाऽवाहयद् वै ॥ 7 ॥

काठिन्यं तत् कटि-तट-पटे पाठितं स्पष्टदृष्टौ
क्लेशांकांश्चांकित-निकषवत् स्वीय-काय-स्थितां श्च ।
संख्यातीतानपि भृशमतोऽमन्यताऽप्यन्यथाऽसौ
पान्थै रन्यैः क्व पथि मिलितैः प्रीयमाणः सुदामा ॥8॥

दूराद् यद्वाऽऽर्जवधरमदो बोधितं वक्रमद्धा
यद् वाऽम्भोभृद्भ्रमभर-दृशि व्यर्थ-दृश्यं तदाप्तौ ॥
किं वाऽरण्यं सुघन-विटपि भ्रान्तदृष्ट्यात्र दूरात्
पार्श्वे गन्तो स्तदपि विरलानोकहं प्राप्यते सत् ॥ 9 ॥

वापीतोयं क्व च पथि पिवन् प्राप्ततोषः पिपासु-
र्भक्ष्यं भिक्षा-सुलभमलभं किंच तत्र क्वचिद् वा ।
अश्नन् भाग्यं सुवृहददघाद् दीर्ण-देहः सुदामा
मैत्रावद्धोऽधिकदरपदोऽप्यताऽनादृतोऽपि ॥ 10 ॥

झंझावातैर्झटिति जगलै र्जर्जरो जाड्यजूति-
र्जीर्णैर्वस्त्रै र्वृतमवयवं व्यात्तवृत्ति श्च बिभ्रत् ।
मार्गे भूयो बहुविध-दरे बाधिते विघ्नवृन्दैः
कृष्णप्रेमाश्रय-तरि-तरः सोऽस्मरत्तं सुदामा ॥ 11 ॥

क्लेशाधिक्यादटन-कठिनः कृच्छ्रयाक्रान्तकायः
पत्नीत्यक्त स्ततपथगतौ क्वापि चिन्ताश्रितात्मा ।
ऋक्षोऽनक्षः खपथ इव वा प्राव्रजत् सोऽध्व-वित्तः
पक्षच्छेदक्षतपदतनू पक्षिवत् प्रेक्ष्ययाणः ॥ 12 ॥

वृष्टिस्नातः क्व च गतिपथे क्वाऽऽतपाद् घर्म-सिक्तः
शीतै र्वातैः शिथिलप्रगतिश्चाचलत् तीर्थ-कल्पम् ।
अम्बास्थानं प्रकृति-तरूणं शान्त-तापोऽमृतं वै
आस्थाऽऽश्वस्तोऽनमदवनतोऽग्रे चरन् तत् सुदामा ॥ 13 ॥

आशामुग्धो विषम-गमनेऽव्याहतात्म-प्रतीति-
र्भ्राम्यन् भूयो विवशवपुषा प्रावहन् वर्त्म-वर्त. ।
विघ्न-क्लेशानमितवितताना गतान् तत्-स्थितान् वा
कृष्ण-प्रेम्णा जव-लव-वहोऽपद्यताऽय-स्तरीवत् ॥ 14 ॥

अध्वन्यग्रे मधु-रसवतीं जीवितान् सान्त्वयन्तीं
चोष्मा-तृष्णा-व्यथित-सिकताः स्रोतसा तर्पयन्तीम् ।
सोऽपश्यद् वै प्रसर-सरितं साम्रमत्याह्वयां तां
भूकल्याण-प्रकृति-सुकृतिः कर्षकाकर्षिका या ॥ 15 ॥

अग्रे गच्छन् विततविपिनं नालिकेरावृतं तत्
ताली-स्तीर्णं सततमतुलं चित्र-चन्द्रातपं वा ।
तत्राऽपश्यत् पथि धृतगतिः शान्ति-संतोष-तृप्तः
स्निग्धेऽनुष्णे घनतरुतलेऽशेत सद्यः सुदामा ॥ 16 ॥

विश्रामान्ते पुनरपसृत-स्वाप उत्साहितः सन्
गच्छन्नग्रे सुगहनगिरिं गौरव-ग्राम-तुंगम् ।
सिंहाध्यासं सरसमसमं गर्वि-गिर्नारिमग्र्यं
सोऽपश्यत्तत् प्रतिपदमपि प्राप्त-प्रत्याशितार्थः ॥ 17 ॥

गन्तोरित्थं विततप्रगतेस्तत्सुदामाह्वयस्य ।
चित्ते वित्तापनमतिगतेः क्रान्ततापश्रमार्तेः ।
चित्रं दृश्यं पथि ततमिदं नेत्र-सार्थक्य-दातृ
प्राश्वासं वै शमसितमते श्चामृतं सिंचति स्म ॥ 18 ॥

प्राप्तोत्साहोऽन्तिक उपगतो मित्रवासस्थलस्य
शस्यक्षेत्रं फलितमतरं पीतवस्त्रास्तृतं वा ।
मन्दान्दोलं मृदु सुमधुरं बोधनं धारयन्तं
वातापातं वन उपवने सोऽग्र आप्नोत् सुदामा ॥ 19 ॥

स्तीर्णं भूम्या उर इव बृहत् प्रान्तरं वर्तमानं
पुष्पाच्छन्नं वनमुपवनं नूनमन्त्यं मनोज्ञम् ।
रम्योद्यानं क्व च पथि पुरोऽपक्व-पक्वान्न-धान्यं-
सोऽपश्यत्तत् प्रततमतुलं क्लान्तिहन्तृ त्वनन्तम् ॥20॥

मार्गे मार्गन् सुभग-गिरिभि र्ग्राम-संघै र्गुणाग्र्यै-
र्मित्र-स्थानं स्वचिति च ततश्चिन्तयन् कान्त-कृष्णम् ।
रम्यं राज्यं सरसमशमं स्वामि-शंसान्वितं च
प्रत्यासन्नं विलसितमतोऽप्यग्र आप्नोत् सुदामा ॥ 21 ॥

दूरादात्ताऽयुतविधुनिधीवाप्यनाद्यप्रदीप्ति
संख्यातीतावसति-विशदं सज्जितं स्वर्णकायम् ।
सौधोत्संगं विविध-सदनं द्वारकाह्वं पुरं वै
सोऽपश्यत् तद्गमन-सफलो हर्ष-शीतांशु-भासः ॥22॥

सह्याद्र्यन्ते विपुल उपले पश्चिमाम्भोधि-प्रान्ते
पादाम्भोजं जलनिधिजलैर्यस्य नित्यं प्रधौतम् ।
हेमामंडं मदन-मुदितं हैर्म्य-मक्षं मवत्तद्
रत्नैर्यत्नै र्विखचित-शिखं पद्मगन्धं तदासीत् ॥ 23 ॥

क्षीराब्धौ श्री र्विबुध-मददा दिव्यधामा यथासीत्
साक्षाल्लक्ष्या सदुदयनिधि र्द्योतधाराप्रधौता ।
धर्मोद्दृप्ता मधु-मद-मुदा द्वारकेयं तथैव
धन्याऽऽदर्शं स्वहृदि दधती भद्रमादृश्यमाना ॥24॥

अम्भोधिस्थं स्मितसरसिजं दिव्यदीप्ति-प्रबोधं
लक्ष्मीं विभ्रत् त्रिदिव-मदनां मन्थनैश्चाप्यनिन्द्याम् ।
देवा दैत्या अनिमिष-दृशाऽलोकयन् वै यथादौ
सोऽपश्यत्तत् सपदि हि तथा द्वारकाह्वं पुरं तत् ॥ 25 ॥

मन्दो वायु र्जलधिजलधृक् जातु जातार्द्र-जल्पः
पान्थानां वै विदमितजवं व्याप्तबाधं विवर्णम् ।
कुर्याद् भूयोऽवयवमवशं चापि संजीवनीव
प्राश्वस्तं तत् सुबलविभवं वृत्तिभावानुवर्तम् ॥ 26 ॥

संचित्रांगा लघुगतिमृगा मार्गभागे सगर्वा
नृत्यन्त श्च त्वरितचरिता अग्रतोऽभंग-रंगाः ।
पान्थान् क्लान्तान् पथि गतिमतोऽतोषयन् येऽत्र तप्तान्
हर्षापन्नोऽप्रतिहतगति स्तानपश्यत् सुदामा ॥ 27 ॥

कामं मेघाः स्वयमपि मिताः क्वाप्यकस्मादनिन्द्या
मन्दान् विन्दून् घृतमृदुमदा प्रादधाना मुदर्थम् ।
सर्वेषां वै व्यवसितवपु र्भावितं वीतबाधं
प्राकुर्वन् तत् क्लमविरहितं स्वस्थमाश्वासितं च ॥28॥

नानावर्णा नयनरमणा खे खगा गीतकंठा
आकृत्यापि प्रकृतिचरितै श्चित्रसत्ता श्चरन्तः ।
भृंगा गुल्मे गहनग-मदा गुंजनाग्र्या उदग्राः
प्राज्यान् पान्थान् पिककुलमितोऽप्रीणयन् नॄन् प्रपन्नान् ॥ 29 ॥

यत्नायत्ताः सुनियतयति-प्रायतांगा मयूरा-
श्चित्रैः पिच्छै र्मुदुदय-मदा नृत्यवन्तः समन्तात् ।
कन्दर्पार्त्तो द्रुतदर-शरश्चेव प्रादारयं स्तान्
कान्तात्यक्तान् प्रतिहतरतीन् नॄन् सुदामादिसर्वान् ॥30॥

उच्चैरभ्रे खचर-खचिते चाभ्रखंडैरखंडे
चित्रं दृश्यं सहृदयहृदि ह्लादकं चानवद्यम् ।
नानावर्णं क्वचन नयनानन्दमध्यायदाद्यं
द्वारावत्या विततमुपरिच्छत्रमूर्वं सुदामा ॥ 31 ॥

क्रान्तक्लेशः क्लमशतगतेः कर्कशाकर्षकान्ते
सत्संकल्पः सुचिचरितैः शंसितं सौख्यदं सत् ।
सार्थक्यं वै सितमिह सकृत् साधु साश्वास-सत्वैः
सोत्साहोऽसौ सुसमय-वशादग्र आप्नोत् सुदामा ॥ 32 ॥

अब्धेरनल्प-सलिलं ललितेव हंसी
संचारिणी सुनियता बृहती तरीस्तान् ।
संतीर्य पारमनयत् पथिकान् पुरार्थं
सर्वान् समुत्सुकमतीन् सह वै सुदाम्ना ॥ 33 ॥

इति दर्शन-शास्त्राध्यापक-श्रीमद्—द्विजेन्द्रलाल-शर्म-पुरकायस्थ-विरचिते मैत्रमाधुर्ये लघुकाव्ये प्रवासाभियानं नाम तृतीयः सर्गः ॥

# मैत्र-माधुर्यम्

## अथ तुरीयः सर्गः

द्वारावती-पुर-पुरः समुपस्थितोऽथ
द्वारेऽस्य पूर्व-दिशि चाशु प्रवेश-मुख्ये।
दौवारिक-प्रतिहतो द्विज आत्तधैर्यो
दैन्यावधीरित-पद स्त्ववदत् सुदामा ॥ 1 ॥

"दूरात् समागत इतः स्थल-दर्शनार्थी
दीनो द्विजोऽहमदम-श्रम-दीर्ण-देहः।
कारुण्यतः कुरु कृतिं कृपया त्वमार्द्रः
कां चोचितां पुरचर प्रतिचिन्त्य चित्ते ॥ 2 ॥

श्रुत्वेति वृत्तिनिरतो द्विज-वक्त्र-मुक्तम्
आर्तं विनीतकथनं पुरपालक स्तत्।
संभावितं तमतिथिं प्रणत स्तथाप्तम्
अन्तःप्रवेश-कृतयेऽन्वमिनोत् प्रसन्नः ॥ 3 ॥

गच्छन् ततोऽग्र उदितः प्रतिपन्न-वित्ति-
मार्गैः सुरम्य-मसृणैर्द्रुम-पद्म-सज्जैः।
सायं स राज-भवनानु-प्रवेश-वर्त्म
हर्षादुपेदविहत-प्रगतिः सुदामा ॥ 4 ॥

दौवारिकोऽदय उदायुध उद्धृतांग-
स्तत्रस्थित स्त्वरितकृद् धृतवेत्र-दंडः।
संत्रासकाकृतिमति धृत-भीतिसत्व-
आसीत्तथास्य तु यथोग्र-कृतान्त-दूतः ॥ 5 ॥

संकोच-कुंचित-चर श्चितचारु-वाच्यं
चैतन्यचंचुरचिरं शुचि चाऽवदत् सः।
"दूरादुपस्थित इतः प्रतिपन्न-मैत्रः
संदर्शनाय नृपतेः स्तुत-सत्त्वमूर्तेः ॥ 6 ॥

तस्मात्त्वमुत्तममते मम मैत्रवृत्ते-
रन्तःप्रवेश-कृतयेऽनुमतिं दधत्तु।
दीनं सुदीर्घ-पदनं क्लमदीर्णमद्य
कृष्णावलोकनकृतौ कुरु सार्थकं माम् ॥ 7 ॥

उच्चैर्विहस्य सहसा स सुरक्षि-मुख्यो
विद्वेष-विक्रम-वृतं वच उच्च-कंठः।
तं चार्तमागतमितोऽवददद्भुतश्री-
"र्न त्वं नृपस्य सदने गमनार्ह एव" ॥ 8 ॥

भूयो विनीतविबुधो बहुभि र्वचोभिः
कार्पण्य-कुंठितमतिं तमतर्कयन्तम्।
संभावयन् अविभवो भवन-प्रवेशे
सोऽयाचताप्यनुमतिं नतिमान् सुदामा ॥ 9 ॥

क्रूरश्च कर्कशकृतिः क्रम-शंकितांको
वृत्त्याधिपत्यवितते र्धृतकृत्य-शक्तिः।
संरोधयन्नकथयत् त्वदयः स रक्षी
"नाद्य क्वचित्तव गतिं र्भविता गृहान्तः ॥ 10 ॥

सायं प्रशासन-सभा-सद आद्यमेव
सम्पन्न-साध्य-सुमतिः सपदि प्रसन्नः ।
त्वक्त्वात्र रिक्तमसितं दयिताश्रितश्री-
र्द्वारावतीपतिरतो रतितृष्ण आस्ते ॥ 11 ॥

तन्नाधुनाऽद्य तु कदाप्यधिकार-दृप्तो
हैर्म्यप्रवेशमसहं गमनोत्सुकाय ।
विश्रामविघ्न-भयतोऽहमविभ्रमस्त-
अर्हामि दिष्टुमधुना त्वमपेहि दूरम्" ॥ 12 ॥

धीमानसावकथयद् दमितः सुदामा
भूयो विनीतवचनै रभिवन्द्य भृत्यम् ।
स्वामि-प्रसन्न-सदने गमनाय बाढं
संयाचमान उचितं चिरचंडवाचम् ॥ 13 ॥

"भूपोऽस्ति वो व्यवहितः प्रभुवृत्ति-वर्तोऽ-
प्याबाल्यवन्धुरबुध प्रतिवेदितव्यः ।
तन्मित्रमत्वरमतोऽनुप्रवेशये मां
मिथ्यैव तेऽत्र सुकृतौ स्वत आत्म-तंकः" ॥ 14 ॥

प्रोक्त स्तथाऽप्यनुचितार्थकृतेः कृतेऽस्य
संबोधनेन च ननु प्रणय-च्युतेन ।
अत्यन्त-कोप-प्रवणः कुपितः प्रभूतं
वेत्रैरताडयदमुं गतधीरतीव ॥ 15 ॥

कृष्णो गृहेऽपि सहसार्तिरवं प्रकुर्वन्
रक्त-स्रवं स्वकतनौ क्षतमंकितं तत् ।
स्त्रीं रुक्मिणीमुपगतां व्यथितः प्रभूतं
संदर्शयन् द्रुतगति र्बहिरागतः सः ॥ 16 ॥

तत्काल आर्तितरल स्त्वरितात्तघात-
आयादितः पुरपतिः प्रतिरोध्य वेत्रम् ।
संतर्ज्य भृत्यममितं च स ताडयन्तं
कृष्णः सुदाम-सखमस्वजतार्तमाशु ॥ 17 ॥

दौवारिक स्तददमं भयविस्मयाब्धौ
संमज्जितो हृतजयो जवतः सलज्जः ।
मित्रद्वयं तु युगपद् यत-युग्म-हस्तो
भूयोऽनमद्-धरिमिव स्वयमेण एव ॥ 18 ॥

प्रेमाश्रु-पाततरलं द्वयमेतयो स्तद्-
वक्षोधृतं ह्युभयतोऽप्युभयात्तवेगम् ।
प्रासादमाद्य-सुखदं समगच्छदाशु
व्यात्तप्रभौ हरिहराविव वीतभेदम् ॥ 19 ॥

देवीमुदग्रवदनां दधतीं सदर्घ्यं
कक्षाद्बहि र्वरवधूं द्वयमग्रवृत्ताम् ।
लक्ष्मीमलक्षयदतोऽक्षयभां हि साक्षात्
क्षीराब्धितोऽक्षततनूं त्विव रुक्मिणीं तत् ॥ 20 ॥

तत् सादरं मधुवदं मिथुनं मुदार्द्रं
मित्रोत्तमं रतमतिं ह्यतिथिं तदाद्यम् ।
नन्दाद् विमुग्धहृदयं द्युमणीन्दुवत् तं
दीर्घैं दिनैः समुदितं सदनेऽनयद् वै ॥ 21 ॥

स्मेराननां सुनयनां नलिनांजलिः सा
तत्प्रेम-मोद-मधुराऽमित-मान-मूर्तिः ।
पंचोपचारचरितैं द्विजमर्चितं तं
सा स्वागतं तदवदत् सपदि प्रसन्ना ॥ 22 ॥

स्वर्णासने सरसिजास्तरणे समृद्धे
हृद्यं निवेश्य सुहृदं पदधावनान्ते ।
पत्युः सखायमतुलं धृतप्रीतिमाप्तं
सा रुक्मिणी तदकरोन्मृदुवीजनं च ॥ 23 ॥

कृष्णः प्रसाद-विशदः स्फुरदुद्धृतश्री-
मित्रांगमात्मकरतोऽप्यकरोत् सुशान्तम् ।
भूयश्च मित्रमसकृत् कुशलं त्वपृच्छत्
स्वास्थ्यं च सौख्य-सुषमामपि तत्-स्त्रियाश्च ॥ 24॥

स्वादूत्तमं त्वमृतजिद्धितकृत् सदन्नं
पद्मेव पद्मकरतः परिपक्तमाद्यम् ।
आदाय दुग्ध-मधुरं चहि रुक्मिणीतः
प्रीत्याप्लुताऽर्पयदथ प्रभवे च सख्ये ॥ 25 ॥

मित्रोत्तरीय-पिहितं किमपि प्रबद्धं
दृष्ट्वैव हृष्टहृदयोऽन्तरवेद ईड्यः ।
कृष्णः सदाग्रहधरोऽवददात्ममित्रं
स्वान्तस्तलेऽप्यवमतं धृत-संशयं च ॥ 26 ॥

"पत्न्या स्तवाप्युपहृतं किमितस्त्वतुल्यं
सख्या मदर्थमपि यत्तव तत् सुगुप्तम् ।
वस्त्राँचलेऽत्र पिहितं चिरप्रेप्सितं मे
सन्दर्श्य देहि तदिदं द्रुतमादृतं त्वम्" ॥ 27 ॥

संगोप्य गूढमपि तद् गतगृह्यतं वा
चित्ते त्वचिन्तयदसौ च चिरं सुचेताः ।
'संभर्जितं बहुदिनैर्दरतंडुलं तद्-
ऐश्वर्य-शौर्य-शिरसि कथमानिवेद्यम् ॥ 28 ॥

क्षुद्रान् कदन्न-कणिकान् यदि दर्शयेयं
किन्न्वेनयो र्भवतु वा अवमाननं वा ।
भूयोऽत्र वैभववतां प्रवरे प्रवृत्ते
नो मे निषेधविधृतावुचिता मतिर्वा' ॥ 29 ॥

सद्यो द्विधाऽऽधृतधियं द्विजमात्मबन्धुं
कृष्णस्तदार्द्र-हृदयोऽवददग्र्य-बोधः ।
"विश्वास एव विहतो मयि किन्नु वा ते
किं बाल्य-मैत्रमथवा व्यवधान-मन्दम् ॥ 30 ॥

गन्धेन पद्मविदलः शरदः प्रसादः
शब्दैरवेद्य उदितोऽपि च बुध्यते वै ।
सन्मित्रयो र्हृदिगतोऽकथितोऽप्यथासीद्-
वेग-प्रभाव उभयोरुभयानुभूतः ॥ 31 ॥

संकोच-संशयवतोऽपि ततः सुदाम्नो
हस्तादुपात्तमचिरान्मतमप्यतुल्यम् ।
संभर्जितं ह्युपहृतं धृततंडुलांशं
कृष्णः सप्रेममनसाऽऽददुपात्तमोदः ॥ 32 ॥

दृष्ट्वेति हृष्टहृदयोत्सुकतां प्रकृष्टां
सा रुक्मिणी तमवदद् दधती स्वनाथम् ।
"मह्यं च देहि कतमं तत-तंडुलांशं
प्रेमाद्य-पावनविभं त्वमृताधिकं त्वम् ॥ 33 ॥

सस्त्रीक-मित्रमतुलं च प्रशस्य कामम्
आनन्द-कन्द उदितो धृतविग्रहो वै ।
प्रेम्णात्तमन्नममृतप्रतिमं प्रतीत्य
भूयश्च भूय उभयं त्वनिवारमाश्नात् ॥ 34 ॥

प्रीत्युत्सुका द्रुतमतिः पुनरुत्तम-श्रीः
सख्या प्रदत्तमगदं कियदन्नमाद्यम् ।
आदत्त प्रार्थयत सा पतिमात्ततृष्णा
प्रेम्णो महत्त्वममृतं समतैक्यघातृ ॥ 35 ॥

प्रेमार्णवः सकरुणो नवमेघ-कृष्णो
मित्रार्थमर्पितमतीरतिकान्तमूर्तिः ।
शुद्धः सुधाऽधरवदोऽघन-दीनवन्धुः
संभावित श्च नितरामभवत् सुदाम्ना ॥ 36 ॥

संचिन्त्य चिन्तनमणि चरितैरचिन्त्यम्
आश्चर्य-चित्त-विचयं चिति चारुचर्चम् ।
दैन्यापनोदवदनाद् विरतस्तदासीत्
तूष्णीं स्थित श्च मनसि प्रशमः सुदामा ॥ 37 ॥

मैत्रामृतेन ममताप्लव-विस्मितात्मा
मुग्धः समादरधियाप्यघनः सुदामा ।
त्यक्तास्मितोऽस्मृत-मतिस्थित-कांक्षित स्तद्-
राद्धोऽवसत् त्विह तयोः कृतिभिः कृतार्थः ॥ 38 ॥

'क्वेतः पवित्रमतुलोत्तम-सत्कृतित्वं
क्वाऽत्रास्ति दैन्यविरति-प्रतिपत्ति-तृष्णा ।
क्वोदारताऽमितरतिः स्तृत-मित्रताऽस्य
तुच्छा क्व प्रार्थनमति मम वित्त-वृत्तिः ॥ 39 ॥

धिङ् मां हि मन्दमननं च प्रमाद-मुग्धं
हेयं सुतुच्छमपि मे घन-प्रार्थनं तत् ।
चित्ते चिरं च रचितं स्तृतमर्चितं च
सद्यः सुधांशु-सदनेऽप्युदितं तमो धिक् ॥ 40 ॥

प्रेमाप्लुते स्वमनसि प्रतिपन्नमानेऽ-
प्यर्थार्थि-प्रार्थनमतः परिलीयतां मे ।
मैत्रामृताम्बुधिजले प्रणयात्मके तत्
स्वार्थ-प्रचिन्तनविडं स्वयमस्ति लुप्तम् ॥ 41 ॥

कृष्ण-प्रसाद-विशदै रनुरोधबन्धैः
शुद्धाग्रहै र्गृहपतेः सकलत्रकस्य ।
प्रेमादरै रदमितै र्दमितोद्यमः सन्
मित्रालयेऽलसदतो दिन-सप्तकं सः ॥ 42 ॥

इत्थं प्रतोषमतुलं गत-तारतम्यम्
आतिथ्यमद्भुतमिदं नितरामवाप्य ।
स्वस्थःस्वतोऽप्यविदितापरकृत्य-चिन्त-
स्तत्राऽवसत् प्रमुदितः प्रणयैः सुदामा ॥ 43 ॥

नित्यं कथोपकथनैः स्मृतितोऽप्यतीतै-
र्नानाविनोद-निगणै र्नयनाभिरामैः ।
दृश्यै श्च खाद्यमदम-स्वदमन्वदच्च
सौम्योऽवसत् सुसमताऽऽसवपः सुदामा ॥ 44 ॥

चर्वाचितै श्च वचनै श्चरितार्थ-वित्तो
वांछाच्युत श्चिति चिरं दिन-सप्तकं च ।
स्वच्छ श्चरन् क्षणमिव प्रमितं प्रतीत्य
सोऽकर्तयद् द्रुतमतिः सुखदं दरिद्रः ॥ 45 ॥

दुःखे हि यः प्रवितनः प्रभवेत्प्रतीतः
कालः सुखे स भवतु त्वरिताऽत्ययो वै ।
किं चिद् विचित्र-चरितं चिंत चिन्तनं नु-
स्तथ्यं त्वसत्यमिव तन् नयतीति चित्रम् ॥ 46 ॥


कालक्रमे क्रमकृतिः स्वकुटीर-गन्तुः
कृष्णेऽभिप्रायमवदत् स विचारदक्षे ।
चित्ते विचिन्त्य प्रचुरं ह्यु चितं सुचारू
खिन्नौ गताविदिशतां—सखि-दम्पतीतः । 47 ॥

तत्-सारथिं तु नृपति स्त्वरयाऽऽहुतं तं
सोऽबोधयत् समुचितं गति-वृत्ति-कृत्यम् ।
पथ्यान्न-यान-सहितात्मरथापनाय
कृष्णो वियोग-दमितोऽदिशवर्थवेदम् ॥ 48 ॥

नाथोऽवदत् तमुदितं कृति-सार्थकं तद्-
"धृत्वाप्तमात्ममनसि प्रचरे र्यथोक्तम् ।
ग्रामोपकण्ठमपि तन्मथुराप्रदेशे
यत्नैस्त्वमापय रथस्थितमद्य मित्रम्" ॥ 49 ॥

प्रणय-विभवमाप्त्वाऽर्थित्वरिक्तात्मचित्तो
कतिपय-दिवसान्ते स्वीय-कान्तां स्मरन् सः ।
स्वगृहमभगमप्यभ्यस्तवासं प्रसादि
मुहुरपि मुहुरद्याऽपद्यतानर्घमर्घ्यम् ॥ 50 ॥

प्रियतम-दयिताद् वै कृष्ण-संगाद् वियुक्तो
द्रुतगति-रथ-यानारूढ एवात्मवासम् ।
सखिचरमपवार्याऽपि प्रशंसन् सदात्मा
स्वक-गृहमभितोऽतोऽपद्यताग्रे सुदामा ॥ 51 ॥




इति दर्शन-शास्त्राध्यापक-श्रीमद्-द्विजेन्द्रलाल-शर्म-पुरकायस्थ-
विचरते मैत्र-माधुर्ये लघुकाव्ये मित्र-संगमो नाम चतुर्थः सर्गः ॥

# मैत्र-माधुर्यम्

## अथान्त्यः सर्गः

"विलंघ्य दुर्लंघ्य-विभंग-कापथं
सकाननानन्त-जघन्य-जन्तुकम् ।
तथाऽऽदृतोऽहं गृहमागतोऽधनः
कथं स्वपत्नीमित सान्त्वयेयम् ।। 1 ।।

वृथा गतिर्मे मथुरात आर्तिदा
ततोऽधिकाधिप्रद-निर्दयाऽऽगतिः ।
स्थिति स्तथैवास्ति गति र्वृथा यथा
ललाट-लेखां किमु लंघयेन्नरः" ।। 2 ।।

स्वमैत्र-मत्तो मति-मर्दित-क्रमः
कृतोद्यमोऽपि भ्रम-मोहिताम्बकः ।
क्लमामित-प्रश्रम-घर्म-मन्थरः
स्वभाग्य-भंगं ह्यभगोऽभरद् भृशम् ।। 3 ।।

श्रमेण कर्मोद्यम-धैर्य-दोहनै-
श्चरित्र-चारुत्व-चयैश्च चर्चितैः ।
अशेष-यत्नैरपि वित्त-संचिते-
रयान्न सोऽत्र प्रतिपत्तिमर्थिताम् ।। 4 ।।

विलुंठितः कुंठित-कंठ-पाटवः
स कंटकाऽऽगुंठितवत् कटत्रपः ।
अपण्डितो दंडन-मंडित स्त्विव
स्वयं विषण्णः सद आसरत् स्वकम् ।। 5 ।।

गृहांगनाग्रेऽग्रसरःस मार्गतः
स्थितः स्वतो विस्मित-नेत्रत स्ततः ।
सुरम्यहैर्म्यं महदुत्तमं नवं
विःन् सुदामादममेत् तु संशयम् ॥ 6 ॥

विचिन्त्य सन्देहमुदात्तमुद्धृतं
किमु प्रमादं स्मृति-मान्द्यमुन्मदम् ।
क्व मे कुटीरं क्व महन्निकेतनं
मृषेत्यसत् स्वप्नसमं हि सोऽदधात् ॥ 7 ॥

भ्रमः किमु क्राम्यत एवमात्मनः
किमु स्वमायाऽप्रमितेह मायिनः ।
स्थलान्तरे वाऽऽगत आर्तिमर्दितोऽ-
प्यचिन्तयत् सोऽचिरमुच्चल श्चिति ॥ 8 ॥

'तरू स्तमालोऽत्र तथैव वर्तते
तथा तडागोऽत्र यथाऽभवत् ततः ।
वनं च नूनं घन-पर्ण-नन्दनं
न भिन्न-भानं भवनान्तिके मम' ॥ 9 ॥

क्षणान्तरे स्वान्तर आचिनोच्च स
कलत्रचिन्ता-चकित स्ततोऽचिरम् ।
स्थलं तदेवेति स तर्कयन्नितः
स्थितस्तथा स्थाणुरिहाऽऽश्रमनो यथा ॥ 10 ॥

तथास्थितं नाथमुपागतं सती
विमुग्धतायामधिदुःखितं पथि ।
अनिश्चितार्थं मति-वंचितं स्वत-
स्तमाह् वयत् साऽट्टकटी-गवाक्षतः ॥ 11 ॥

द्रुतं हि सौधादवतीर्य नन्दिताऽ-
प्यलिन्द-चन्द्रातप-मादनाधृते ।
गृहांगनाग्रेऽग्र्य-भगांऽगनाऽऽगता
पतिं तमालिंग्य च साऽनयत् सदः ॥ 12 ॥

तदा सुदामा दयितामुरोधृता-
मपृच्छदाद्यां मधुरां सुवादिनीम् ।
समुत्सुको विस्मय-पूल-मापनः
"क्व तत्कुटीरं क्व च वोत्कटोऽट्टकः ॥ 13 ॥

कुतो गतं मे क्षयि कक्ष-भृद् गृहं
विशाल-सौधागम एव वा कथम् ।
वदेः प्रिये त्वं कथमत्र तिष्ठसि
ससेवका कः पतिरस्ति सम्पदाम्" ॥ 14 ॥

सती स्मितास्या स्वपतिं तदाह सा
"पति स्त्वमासां हि समस्त-सम्पदाम् ।
भ्रमो न च स्वप्न इतो न विस्मयो
गृहाण तत्कृष्ण-कृपैव कारणम् ॥ 15 ॥

चरश्च वै तादृश आचरन्नितः
समागतः सन् द्रुतमात्तवैभवः ।
नृपस्य कृष्णस्य प्रतिश्रुतिश्रितः
समस्तमेतद् व्यदधात् स आशुधीः ॥ 16 ॥

ऋतं च तथ्यं नितरां सविस्तरं
वदन्त्यसौ सादरमर्पयत्तदा ।
प्रतिश्रुतिं साक्षरकां क्षणेऽक्षयां
स्मितात्र पत्युः करपंकजाय ताम् ॥ 17 ॥

प्रदत्तमर्थं सुप्रियेण मैत्रतोऽ
प्यनर्थितं तन्मतिसंवृतं द्रुतम् ।
स्वतोऽधनायाद्य धनार्थिने तथा
छलैः सुदाम्नेऽदमप्रेमसम्पदा ॥ 18 ॥

ततः सुदामाऽमनुताऽत्ममानसे
'प्रतीतमित्रेप्सित आप्तधीः सखा ।
छलेन दारिद्र्य-विभंजनं मम
दयानिधानो व्यदधादसौ रहः ॥ 19 ॥

बुधा न धात्रिन्द्र-वृषध्वजादयो
विदन्ति गोविन्दकृते स्त्वतन्द्रिताः ।
अचिन्त्यचर्यां चिरमर्चितां च याम्
अमेयमायां किमु वेद्मि तामहम् ॥ 20 ॥

विचित्रचारा चिरचारुचिन्तना
सुमैत्र-माहात्म्यमितिःसुमायिनः ।
प्रियास्ति कृष्णस्य हि प्रेमिणोऽक्रमाऽ-
मितात्ममायेतिमतं मुहुर्मम' ॥ 21 ॥

प्रभावितो वैभववान् विभान्वितः
स मित्र-मैत्रात् कुमुदो यथेन्दुनः ।
अहो महत्वान्मधुरं मुरद्विषो-
भवे भवेद् वाऽपरमस्तु किं ततः ॥ 22 ॥

प्रियं सखायं प्रतिशंसितं भृशं
स्मरंश्च चिन्तामणिमन्तरेऽन्ततः ।
विचिन्त्य सोऽवोचदचिन्त्य-चर्चितं
प्रति स्वपत्नीं पतिरात्त-वैभवः ॥ 23 ॥

"प्रियेऽत्र यातु प्रथमा नमस्कृति-
रितस्तु नौ सप्रति सम्पदापनात् ।
सुदीर्घ-दारिद्र्य-निदारुणाधृते-
र्विमुक्तिमत्वात् सखि-कृष्ण-मायिनम् ॥ 24 ॥

अवाप्य सौभाग्यमथाऽग्रतः सुखि
प्रियेऽधुना धन्यमधद्वहि प्रियम् ।
स्वजीवनं जीवनयोग्यमुज्ज्वलं
वसु-प्रशस्तं सरलं सुसज्जितम् ॥ 25 ॥

यतः सुखाप्ति स्त्वमितैतदावयोः
सुसार्थकं जीवितमर्थ-संतति ।
ततो हि सर्वं स्वयमर्पयाम्यहं
स्मृताय सख्ये वनमालिने नमन् ।। 26 ।।

अविरत-नति-भक्ति-प्रेम-सत्व-प्रपत्तिः
सुनियत-कृति-वृत्तं संनिवेद्यैव कृष्णे ।
सखि-नतिकृतिमाप्त्वाऽतुल्य-रत्नां च हैमीं
धृतरतिमति रस्तौत् तत् स्वपत्न्या सुदामा ।। 27 ।।

सहृदय उदितार्थो दान-धर्मो दयार्द्रो-
प्यभयमुभय उर्वी-संभवान् संप्रसाद्य ।
अकल-सकल-लोकान् पालयन् प्रेमलग्न-
श्चिरमिह विचरं श्चासीत् तथैवाथ पृथ्व्याम् ।। 28।।

'कृष्णण स्वधियैव मदयं मैत्रामृतादद्वयाद्-
दारिद्र्यार्ति-विदारणाद् द्रुतमिदं ऋद्धं च मज्जीवनम् ।
सर्वाभीष्ट-विशिष्ट-मिष्टमधुनाऽत्युत्कृष्टमदृष्टतः
कृष्ण-प्रेममयं समृद्धिमुदितं तस्मै भवेदर्पितम् ।। 29 ।।

इत्यालोच्य फलाभिलाष-रहितः संकल्प-बन्धोन्नतं
सद्भावै श्च सुवृत्ति-साम्य-चरितैः सर्वेषु जीवेष्वतः ।
धर्मादर्श-सुदान-पुण्य-तरुणं संगच्युतं सत्यधृद्-
धन्यं शुद्धधियाऽऽदृतं भुवि चिरं सज्जीवनं सोऽदधात् । 30 ।।

---

इति दर्शन-शास्त्राध्यापक-श्रीमद्-द्विजेन्द्रलाल-शर्म-पुरस्कृ त थ-
विरचिते मैत्र-माधुर्ये लघुकाव्ये गृह-प्रत्यागमनं नाम अन्त्यः सर्गः ।।